# सामाजिकजीवने लौकिकन्यायस्य उपयोगिता

## Sāmājikajīvane laukikanyāyasya upayogitā

**Dilip Tapadar**
Research Scholar, Dept. of Sanskrit-Pali-Prakit
Visva Bharati University, Bolpur, West Bengal, India
Email: diliptapadar343@gmail.com

**Abstract:** वैदिकयुगात् आरभ्य, स्मृतिपुराणेषु, उपनिषत्सु, काव्येषु, न्यायमीमांसादिदर्शनेषु च लौकिकन्यायाः विशेषतोऽवलोक्यन्ते। 'नि' उपसर्गपूर्वकं 'इ' धातोः 'घञ्' प्रत्ययेन 'न्याय' इत्यस्य शब्दस्य निर्माणं भवति, यस्य अर्थः समता, तुल्यता, उपयुक्तदृष्टान्तः नीतिवचनं च। लौकिकजीवने च शास्त्रेषु च कस्यचित् घटनायाः विशेषस्थितेः वा संक्षिप्तसाररूपेण वाक्यरूपेण लौकिकन्यायस्य प्रयोगः क्रियते। लौकिकन्यायैः अल्पशब्दैः युक्तियुक्तरूपेण विचारः व्यक्तुं सुलभः भवति। लौकिकन्यायः इत्यस्य अर्थः— सामान्यजीवने उत्पन्नाः परिस्थितयः, अनुभवानुभूतयः वा, येषां आधारतः दृष्टान्तरूपेण न्यायविधानं क्रियते। एते न्यायाः न केवलं शास्त्रीयचर्चायामुपयुक्ताः, अपि तु सामान्यजीवनवर्तिनामपि जिज्ञासूनां कृते अपूर्वं प्रबोधनं वहन्ति। स्ववाक्यस्य संक्षेपेण यथार्थरूपेण प्रस्तुतीकरणाय ये दृष्टान्ताः प्रयुज्यन्ते, वा ये दृष्टान्ताः शास्त्रेषु प्रयुज्यन्ते, ते एव न्यायाः। अधुना विविधेषु पुस्तकेषु चित्राणि मुद्यन्ते यथा अदृश्यानि श्रवणातीतानि ज्ञेयविषयाः जिज्ञासुभ्यः बोधगम्याः क्रियन्ते, तथा एते दृष्टान्तमूलका न्यायाः अपि कठिनं च अदृश्यं च ज्ञेयवस्तु सहजबोध्यं कर्तुं प्रयुज्यन्ते। वक्तारः, आचार्याः, उपदेशकाः च यदा श्रोतृजनानां समीपे कठिनं वा नूतनं विषयं सुलभतया व्याख्यातुं इच्छन्ति, तदा ते एतेषां लौकिकन्यायानां प्रयोगं कुर्वन्ति। एते लौकिकन्यायाः तु न केवलं शिक्षायां, उपदेशे वा, किन्तु दैनिकजीवने, नीतिनिर्णये, सामाजिकसंवादे च सर्वत्र सप्रयोजनं दृश्यन्ते।

**Keywords:** लौकिकः, सिंहावलोकनन्यायः, पङ्कप्रक्षालनन्यायः, दग्धबीजकल्पन्यायः, शतपत्रभेदन्यायः।

**भूमिका—**

यथा विविधभाषासु स्वस्वभावप्रकाशनाय विविधाः प्रसिद्धाः प्रबन्धाः, लोकोक्तयः, इत्यादयः प्रयोगाः दृश्यन्ते, तथा संस्कृतशास्त्रेऽपि अतीवप्राचीनकालात् आरभ्य उपमादानाय, अथवा कस्यापि परिस्थितेः वर्णनाय याः उक्तयः प्रयुज्यन्ते, ताः लौकिकन्यायाः इत्युच्यन्ते। संस्कृतशास्त्रे 'न्याय' इत्येतस्य नानाप्रयोगा दृश्यन्ते, तथापि शास्त्रकाराः प्रायः किञ्चिद् घटनां वा विषयविशेषं

सङ्क्षेपेण किन्तु सारगर्भितरूपेण निरूपयितुं लौकिकन्यायं गृहीत्वा भाष्यन्ति। न्यायशब्दस्य व्युत्पत्तिः "नीयते प्राप्यते अनेन इति न्यायः" अर्थात् येन उपायेन यथार्थनिर्णयं प्राप्तुं शक्यते, स एव न्यायः इति कथ्यते। लौकिकन्यायाः नाम कीदृशाः? — ताः खलु समाजे सुप्रचलिताः सुप्रसिद्धाश्च दृष्टान्ताः, याः निश्चितेन नाम्ना सूच्यन्ते, एवञ्च यथासमये प्रयोगेण संक्षेपतः कोऽपि गंभीरार्थः सुलभतया प्रकाश्यते एषा प्रयोगपद्धतिः यथार्थतः "समुद्रस्यैकबिन्दुरूपेण प्रस्तुति" इत्युच्यते। एवं न्यायप्रयोगेन युक्तिसंयुतं, सङ्क्षिप्तं च विचारप्रस्तावनं साध्यते। यदा कश्चन अल्पज्ञः जनः कस्मैचन प्रमेयाय यथावद्बोधनार्थं प्रयत्नं करोति, तदा समुचितं वाक्यम्, दृष्टान्तः, उपमानं वा — यः सर्वः न्यायः रूपेण निर्दिश्यते — तेन तस्य प्रमेयस्य बुद्धिगम्यता साध्यते। अतः ज्ञानीजनाः स्वविषयस्य सुस्पष्टबोधनाय योग्ये समये विविधाः न्यायान् यथायोग्यं प्रयुञ्जते। मानवाः दैनिकजीवने, अथवा शास्त्रकाराः शास्त्रनिर्माणे, ये दृष्टान्ताः युक्तिपूर्वकं प्रयुञ्जते ताः एव न्यायाः इत्युच्यन्ते- "लोकोक्तशास्त्रप्रसिद्धदृष्टान्तविशेषः न्यायः"।

'न्याय' इति शब्दः संस्कृतसाहित्ये सामान्यतः सत्यम्, युक्तिः, नीतिः अथवा निर्णयस्य प्राप्तेः उपायं दर्शयति। जनमानसे अयं चिरंतनः, सार्वजन्येन स्वीकृतः च अनुभवसिद्धः नीतिस्वरूपेण प्रतिष्ठितः अस्ति। न्यायः मुख्यतः द्विधा विभागः अस्ति –

**१. लौकिकन्यायः** – सामान्यजनानां जीवनं प्रति दृश्यमानानि यथार्थदृष्टान्तानि, यानि युक्तिनिर्भरविचारप्रक्रियायाम् उपकारी भवन्ति। नित्यजीवनस्य परिस्थितिभ्यः, अनुभवात् च सामाजिकयथार्थात् उद्भूतः एषः न्यायः विचारशीलचिन्तनं सुलभं करोति।

**२. शास्त्रीयन्यायः** – दर्शनशास्त्रे तर्कशास्त्रे च प्रयुज्यमानः युक्तिसङ्गतः उपायः, यः निर्णयस्य सिद्धान्तस्य च स्थापनायां महत्त्वपूर्णं भूमिका वहति।

वेदेषु, शास्त्रेषु, साहित्येषु च न्यायस्य प्रयोगः केवलं तथ्यानां युक्तीनां वा प्रस्तुतिर्न अस्ति, अपि तु भाषायाः सौन्दर्यवर्धनस्य एकः उपायः अपि अस्ति। अयं जटिलं चिन्तनं सरलयति, महत्त्वपूर्णार्थं संक्षेपेण व्यक्तुम् अपि सहायकः भवति। भाष्यकारैः न्यायः केवलं एकं युक्तिप्रणालीरूपेण न, किन्तु निर्णयस्य प्राप्त्याः एकं सुबद्धं पद्धतिरूपेण अपि परिगणितः। संस्कृतसाहिते बहवः लौकिकन्यायाः दृष्टवन्तः, ये युगेषु युगेषु ज्ञानचर्चां, भाषा च साहित्यं च समृद्धवन्तः। अस्मिन्नेव प्रबन्धे तादृशानां किञ्चन प्रमुखानां विशिष्टानां च लौकिकन्यायानां व्याख्या प्रस्तूयते।

**सिंहावलोकनन्यायः –**

"सिंह" इति शब्दः कस्यचित् पशोः बोधकः, "अवलोकनम्" इति पुनः दर्शनं वा पश्चात्प्रतिलोकनं बोधयति। अस्य न्यायस्य व्याख्यायां कथ्यते—सिंहः यदा कञ्चन मृगं हत्वा अग्रे गच्छति, तदा सः मध्ये मध्ये पश्चात् अपि पश्यति। सिंहस्य एषः स्वभावः एव "सिंहावलोकनन्यायस्य" आरम्भकारणं जातम्। अस्य न्यायस्य एकं श्रेष्ठं उदाहरणं लभ्यते "साङ्ख्यतत्त्वकौमुदी" ग्रन्थे, "अतदूरात्..."[1] इत्यस्य कारिकायाः विवेचने। तत्र कारिकायां

हेतुवाचकानि अष्ट पञ्चमीविभक्तिशब्दाः उपयुक्ताः, किन्तु तानि केन हेतुना प्रयुक्तानि — कस्य फलस्य कृते एते हेतवः? — इत्येतत् स्पष्टं न दृश्यते। अतः कारिकायाः अर्थः न सम्पूर्णतः स्पष्टः वा सुसम्बद्धः भवति। अत्र एव सिंहावलोकनन्यायस्य उपयोगः आवश्यकः भवति। अष्टमे कारिकायां दृष्टं "अनुपलब्धिः" इति शब्दं, पूर्वस्य सप्तमकारिकायाः हेतुभिः सह संयोज्य अवगन्तव्यः। यथा सिंहः अग्रे गच्छन् अपि मध्ये मध्ये पृष्ठतः पश्यति, तथा अत्र अपि अष्टमकारिकायाः पदं सप्तमकारिकायाः पदैः सह अन्वयीकृत्य तस्य अर्थः प्रकाशितव्यः।

एतेन न्यायेन अस्माकं शिक्षायाः अपि एकं गूढं सन्देशं लभ्यते—यद्यपि वयं जीवनपथे निरन्तरं अग्रे अग्रे गच्छामः, तथापि कदाचित् पृष्ठतः अपि दृष्टिं कर्तव्या, पूर्वसङ्गतयः स्मरणीयाः च। यदि सिंहावलोकनन्यायः न अनुपालितः स्यात्, तर्हि सप्तमकारिकायाः अर्थः अस्पष्ट एव अवशिष्येत। अतः अस्य न्यायस्य प्रयोगेन अष्टमकारिकायाः "अनुपलब्धिः" इत्येतत् पदं पूर्ववर्ती हेतुभिः सह अन्वितं सन्, सम्पूर्णकारिकायाः विवेचनं स्पष्टं सम्यक् च भवति।

**पङ्कप्रक्षालनन्यायः –**

प्राचीनभारते एकः प्रसिद्धः न्यायः अस्ति — पङ्कप्रक्षालनन्यायः इति। अयं न्यायवाक्यं नकारात्मकानुभवात् निष्पन्नः, यः मानवानां दैनन्दिनजीवने अत्यन्तं प्रासङ्गिकः दृश्यते। अत्र "पङ्कः" इत्यनेन कर्दमः, मलिनता वा दूषितावस्था लक्ष्यते; "प्रक्षालनम्" इत्यनेन तस्य शुद्धिकरणं, प्रक्षालनं वा सूच्यते। अस्य न्यायस्य मूलार्थः — कर्दमे न पतित्वा, तं दूरतः परिहृत्य एव गन्तव्यम्। एकवारं यदि कर्दमे पतितम्, तर्हि तस्मात् निष्क्रान्तिः कठिनः, श्रमसाध्यः, चिरकालप्रयत्नसाध्यश्च भवति। तथैव जीवनस्य केचन दुर्निर्णयाः अपि सन्ति, ये एकवारं स्वीक्रियन्ते चेत् तेषां परिहरणं कठिनं, दीर्घकालं, श्रमसाध्यं च भवति। अतः अस्य न्यायस्य प्रमुखं शिक्षणं यत् — दोषस्य उपचारः तु कठिनः, परन्तु पूर्वसावधानता तस्मात् श्रेष्ठा। अर्थात्, यथापि कर्दमं प्रक्षालयितुं शक्यते, तथापि तं स्पृशितुं न यत्नं करणीयः, अपि तु दूरतः एव परिहरणीयः। एषः न्यायः प्रतिरोधप्रधानदृष्टिकोणम् अवलम्बते — यः प्रतिकारात् अधिकं प्रतिरोधम् उपादत्ते। जीवने समस्याः, संकटानि वा, यदि पूर्वमेव विवेकपूर्णया दृष्ट्या परिहार्यन्ते, तर्हि तेषां दुष्परिणामानाम् आपत्तिः न सञ्जायते। तस्मात् उच्यते "प्रक्षालनाद् हि पङ्कस्य दूरादस्पर्शनं वरम्"। इदं वाक्यं न केवलं शब्दतः, अपितु जीवनदृष्ट्या अपि अत्यन्तं सार्थकं शिक्षाप्रदं च वर्तते।

आधुनिकजीवने अस्य न्यायस्य प्रासङ्गिकता अनन्ता। केचन जानन् अपि तादृशेषु कर्मसु संलग्नाः भवन्ति ये शरीरस्य, मनसः, समाजस्य च हानिकराः सन्ति। यथा — मद्यपानं, धूमपानं, अनियमितं निद्रालाभः, तन्त्रज्ञानासक्तिः इत्यादयः। एतेषां फलस्वरूपेण ते शनैः शनैः शारीरिकमानसिकरोगैः पीडिताः भवन्ति। अनन्तरं ते चिकित्सा, औषध, आहारनियमः, योगाभ्यासः, चिकित्सा-परामर्शः इत्यादीनां साहाय्येन स्वस्य आरोग्यं पुनः प्राप्तुं प्रयत्नं कुर्वन्ति। किन्तु तदा तेषां समयः, धनम्, शक्तिः च व्यर्थं गच्छन्ति। एवमेव शिक्षायामपि दृश्यते यत् केचन

आरम्भे अध्ययनाय महत्वं न दत्त्वा समयस्य नाशं कुर्वन्ति, परीक्षणस्य पूर्वं हतावस्थायां अध्ययनं कृत्वा मानसिकदबेन पीडिताः भवन्ति। यदि ते आरम्भे एव योजना कृत्वा अध्ययनं कुर्वन्, तर्हि तादृशाः समस्याः न सञ्जाताः स्युः।

एषः 'पङ्कप्रक्षालनन्यायः' न केवलं वैयक्तिकजीवने, अपि तु सामाजिकराजनीतिकक्षेत्रेषु अपि लागू भवति। यथा — यदि शासनं प्राकृतिकविपत्तीनां, महामारीणां, वा दरिद्रतायाः इत्यादीनां निवारणार्थं पूर्वमेव उपायान् कुर्वीत, तर्हि अनन्तरं संकटकाले शीघ्रं क्रियाशीलतां प्रदर्शयितुं न आवश्यकं स्यात्। भ्रष्टाचारस्य, अपराधानां, सामाजिकपतनस्य च विषये अपि एषः न्यायः प्रयोज्यते — उपचारात् निवारणं श्रेष्ठम्।

पङ्कप्रक्षालनन्यायः अस्मान् शिक्षयति यत् सजगता च पूर्वसावधानता च एव जीवनस्य प्रमुखा नीतिः। यथा कर्दमेन लिप्तं शरीरेण तत् मार्जयितुं यत्नः व्यर्थश्रमं हानिं च जनयति, तथैव जीवनपथे भ्रमित्वा पुनः सम्यग्गतिं प्राप्तुं यत्नः अपि कठिन एव भवति। अतः सर्वदा तादृशात् कर्मभ्यः आत्मानं निवारयितव्यम्, यानि भविष्यति नः हानिकारिणि स्युः। एषः न्यायवाक्यं अस्मान् प्रतिदिनजीवने आत्मनियन्त्रणस्य, दूरदर्शितायाः, सद्विवेकस्य च पाठं ददाति। "प्रतिकारात् निवारणं श्रेष्ठम्"—इति संदेशः अद्यापि समानेव प्रासङ्गिकः च आवश्यकः च अस्ति।

**दग्धबीजकल्पन्यायः —**

दग्धबीजकल्पन्यायः नाम एकः रूपकपरः तात्त्विकः युक्तिप्रकारः अस्ति, यः दर्शयति— यद्यपि किञ्चन वस्तु अथवा शक्तिः बाह्यतः सन्निहिता दृश्यते, यदि सा स्वकीयं कार्यकारितां नाशं गच्छति, तर्हि तस्य फलस्य उत्पादनं न सम्भवति। यथा बीजं दग्धं चेत् तस्य अंकुरोदयशक्तिः न भवति, तथैव पुरुषस्य अविवेकात् यः संसारः जीवस्य उत्पाद्यते, तस्मिन् विवेकोत्पत्तेः पश्चात् स संसारः दग्धबीजस्य न्यायेन न पुनरुत्पद्यते। पुनः कर्माशयस्य फलं यदा प्रश्नायते, तदा तत्त्वकौमुद्यां वाचस्पतिमिश्रः उदाहरणं दत्त्वा तस्य समन्वयम् अपि दर्शयति[2]। यथा जलेन सिंचिते भूमौ बीजं निक्षिप्यते। यदि बीजं अक्षतम् अस्ति, तर्हि तत् अंकुरं जनयति। किन्तु यदि तत् बीजं अग्निना दग्धं स्यात्, तर्हि सः बीजः सरसि भूमौ अपि स्थितः सन् अंकुरं न उत्पादयति। एवं कर्माशयः अपि बीजसमानः। बुद्धिः वा अन्तःकरणं भूमिसमानम्। अविद्यादयः पञ्च क्लेशाः जलसमानाः। क्लेशाः अनादिकालपर्यन्तं प्रवर्तमानाः, अतः सरसबुद्धिभूमौ कर्माशयरूपाणि बीजानि स्वाभाविकेन प्रकारेण भोगाङ्कुरं उत्पादयन्ति। किन्तु तत्त्वज्ञानं कर्माशयम् एव कुटिलं दग्धं च करोति, येन तस्य कर्माशयस्य भोगजननशक्तिः नश्यति। तत्त्वज्ञानात् बुद्धिभूमिः अति-शुष्का उषरा च भवति। यथा ग्रीष्मकाले प्रखरस्य सूर्यकिरणस्य प्रभावेन भूमिः दग्धा सति बीजं अंकुरजननं न शक्नोति, तथैव यदि बुद्धिः तत्त्वज्ञानेन अविद्यादिशून्या जाता, तर्हि धर्माधर्मयोः फलं न कदापि निष्पद्यते।

योगदर्शने अपि समानतः उक्तं— दग्धबीजात् यथा अंकुरः न भवति, तथैव समाधिप्राप्तेः अनन्तरं दग्धबीजकल्पाः क्लेशाः बृत्तिं न उत्पादयन्ति[3]। उदाहरणरूपेण 'अहं शरीरः' इत्येतत्

एकं अविद्यामूलकं क्लिष्टवृत्तिः। समाधिस्थितेः अनन्तरं तत्त्वज्ञानद्वारा 'अहं शरीरं न अस्मि' इत्यस्य सम्यगुपलम्भः जायते। समापत्त्यवस्थायां सा प्रज्ञा चित्ते सर्वदा व्याप्ता भवति। तदा 'अहं शरीरः' इति वृत्तेः संस्कारात् तादृशवृत्तिः पुनः न जायते। तस्मिन् काले 'अहं शरीरः' इत्येतत् अभिमानरूपं सर्वं भावः सर्वकालाय निबृत्तः भवति।

दग्धबीजकल्पं न केवलं दर्शनशास्त्रीयं उपमा, अपितु एषः शक्तिशालि आत्मोपलब्धेः साधनम् अस्ति। एतस्मात् ज्ञायते यत् केवलं बाह्यपरिवर्तनानि न, अपि तु अन्तःप्रज्ञायाः प्रकाशेनैव नित्यं मोक्षः साध्यः। यद्यपि कर्माशयः संस्काराः क्लेशाः च सन्ति, तथापि तत्त्वज्ञानप्राप्त्या दग्धः स्यात् तर्हि तानि न पुनः फलप्रदाः भवन्ति। एतत् सत्यं यः साक्षात्करोति सः स्वस्य मिथ्याभिज्ञानानुभवानां च भोगकेन्द्रितचेतसः परिमृज्य, परमसत्यस्य पन्थानं समुपगच्छति।

**देहलीदीपन्यायः —**

'देहली' इत्युक्तेऽस्ति द्वारस्य उपान्तः भागः, 'दीपः' इत्युक्ते प्रकाशदायकः दीपः। यदा कश्चिद् दीपः देहल्याः अधः स्थाप्यते, तदा सः दीपः न केवलं गृहस्य अन्तर्भागं प्रकाशयति, अपि तु गृहद्वारस्य बाह्यभागं अपि प्रकाशितुं समर्थः भवति। एवं प्रकारेण एकस्मिन् स्थाने स्थित्वा द्वौ प्रकारौ कार्ययोः साधनं यदि क्रियते, तर्हि तत्र अस्य न्यायस्य प्रयोगः भवति। युगपत् उभययोः उद्देशयोः सिद्ध्यर्थं अस्य न्यायस्य उपयोगः दृश्यते। यथा — "एकेन अश्मना द्वौ पक्षिणौ हन्येते", "रथदर्शनं च कदलीविक्रयश्च" इत्यादि।

एषः न्यायः न्यायशास्त्रे, धर्मशास्त्रे, तर्कशास्त्रे च प्रायः प्रयुज्यते यत्र एकस्मात् उपायात् युगपत् द्वौ वा अधिकाः फलप्राप्तयः सिध्यन्ति। सामान्यजीवने अपि एषः न्यायः अतीव समीचीनः अस्ति। अयं न्यायः पदार्थोपयोगस्य पद्धतिं बोधयति। मानवः इच्छति चेत्, तर्हि कस्यचित् पदार्थात् सीमितं लाभं प्राप्नुयात्, अथवा असीमितं च। तदर्थं तेन पदार्थस्य उपयोगस्थानं च उपयोगपद्धतिं च ज्ञातव्यम्। उदाहरणतः — यदि कश्चन पुरुषः प्रतिदिनं सूर्योदयात् पूर्वं उत्तिष्ठति, नियमितं शरीराभ्यासं करोति च, तर्हि सः एकस्मात् पक्षात् शारीरिकरूपेण आरोग्यं लभते, अपरस्मात् पक्षात् शीघ्रं जागरणस्य कारणेन अनेकेषां कार्याणां सिद्धिः भवति, बहु समयः अपि लभ्यते। एवमेव — यः छात्रः पठने ध्यानं दत्ते, सः न केवलं परीक्षायाम् उत्तीर्णः भवति, किन्तु ज्ञानसम्पन्नः अपि भवति। यः जनः सेवायां रतः अस्ति, सः आत्मनं शुद्धयति च, समाजस्य कल्याणं अपि करोति। एते सर्वे दृष्टान्ताः 'दोहलीदीपन्यायस्य' प्रतीकत्वेन द्रष्टव्याः।

एवं यदि कश्चन व्यक्तिः वा कश्चन वस्तुना एकस्मिन्काले द्वे आवश्यके सिध्येते, तर्हि तादृशे प्रसङ्गे अस्य न्यायस्य प्रयोगः सङ्क्षेपेण कर्तुं शक्यते। भारतीयवाङ्मये अस्य न्यायस्य उल्लेखः न केवलं लोकोक्तिरूपेण अस्ति, अपितु एषः जीवनोपयोगिनां सूत्राणां मध्ये एकः बहुमूल्यः तत्त्वबोधकः न्यायः इति मान्यते।

**शतपत्रभेदन्यायः**[4] –

शतसंख्यानि पद्मपत्राणि एकस्मिन् अपरस्मिन् उपरि संस्थाप्य यदा सूचिना भेदनं क्रियते, तदा तस्मिन् भेदने युगपज्ज्ञानस्य भावः इव प्रतीतिः जायते। किन्तु एषा युगपज्ज्ञानप्रतीतिः भ्रान्तिरेव। कालस्य अतीवसूक्ष्मत्वात् तस्य यथार्थानुमानं न शक्यते। यतः—प्रथमं सूचिपत्रसंयोगः, द्वितीयं पत्रावयवेषु क्रिया, तृतीयं पत्रावयवविभागः, चतुर्थं आरम्भसंयोगनाशः, पञ्चमं पत्रनाशः। एवं प्रत्येकपत्रभेदने बहुकालविलम्बः लक्ष्यते। तद्वदेकस्मिन्नेव काले चाक्षुषं चित्रदर्शनं, श्रोत्रेण सङ्गीतश्रवणं, रसनया चर्वद्रव्यस्वादनं च युगपत् सम्पद्यते इत्यपि दृश्यते। एषु स्थलेषु अपि युगपज्ज्ञानस्य यः अनुभवः, स अपि भ्रान्तिरेव। यतः— पृथिव्यां यावन्ति अपि शीघ्रगतिकानि वस्तूनि दृश्यन्ते, तेषां मनसा सह तुलना न शक्यते। मनसः गमनं अतीवद्रुतगतिकं, कल्पनातीतं च। एवं क्रमेण निष्पन्नानां विषयाणां युगपज्ज्ञानस्य यः अनुभवः जायते, स तु भ्रान्तिरूपः, न तु यथार्थः। एवं क्रमेण संहितानां विषयाणां युगपज्ज्ञानभ्रान्तौ अयं न्यायः योजनीयः।

शरीरे स्थितस्य मनसः एषा अतिद्रुतगतिरेव कारणं येन प्रतीतिः जायते यथा मनः एकस्मिन्नेव क्षणे चक्षुः, कर्ण, रसना इत्यादि इन्द्रियैः सह संयुक्तं भवति। तस्मात् ज्ञानेषु अपि एकस्मिन्क्षणे उत्पत्तिर्भवतीव। किन्तु वस्तुस्थितिः तथा नास्ति। यद्यपि मनः अतीवद्रुतगतिकं, तथापि चक्षुरादीनि इन्द्रियैः सह तस्य संयोगः क्रमेण एव भवति। क्रमशः इन्द्रियसंबन्धस्य कारणेन ज्ञानानामपि उत्पत्तिः क्रमशः एव जायते। क्षणविलम्बेन, अव्यवधानतया ज्ञानोत्पत्तिः दृश्यते, तस्मिन्नेव क्षणे प्रत्यक्षेण तस्य अनुभवं कर्तुं अशक्यत्वात्, युगपज्ज्ञानस्य भ्रान्तिः जायते। एषा मनसः अतीवद्रुतगतिरेव भ्रान्तेः कारणम्। अत एव, यदा ज्ञानेषु युगपज्ज्ञानस्य भ्रान्तिः दृश्यते, तदा तस्य निरसनाय अयं "शतपत्रभेदन्यायः" यथोचितः प्रयुज्यते। एषः मनसः अतीव शीघ्रगतेः च तया निर्मितस्य यौगपद्यभ्रमस्य आधारेण एव स्थाप्यते। यदा वयं किञ्चिद् परिवर्तनं वा अनुभवम् 'एकत्र' वा 'युगपद्' इति अनुभवामः, तदा प्रकृतेः सूक्ष्मा क्रमिकता अस्माकं अवधारणायाः परे गच्छति।

एतस्मिन् समये शतपत्रभेदन्यायः अस्मान् स्मारयति यत्— वस्तुतः सर्वं क्रमेण, क्रमशः च किञ्चित् कालविलम्बेन एव सम्पद्यते, किन्तु मनसः अतीव शीघ्रगतेः कारणेन वयं तत् युगपद् इव अनुभवामः। अत एव, एषं न्यायं प्रयुञ्जानाः वयं भ्रान्तिं परिहरित्वा प्रकृतेः यथार्थगतिं च क्रमं च ज्ञातुं शक्नुमः। अयं न्यायः तत्त्वदृष्ट्या मनसः स्वरूपं, ज्ञानोत्पत्तेः प्रक्रिया च कालस्य अनुभवस्य च सूक्ष्मस्वभावं अवबोधयितुं साहाय्यं करोति।

**पिष्टपेषणन्यायः —**

'पिष्ट' इत्युक्ते — पेषितं वस्तु। 'पेषण' इत्युक्ते - पुनः पेषणम्। अतः 'पिष्टपेषण' इत्यनेन न्यायेन तस्य वस्तुनः पुनः पेषणक्रिया निरर्थका इत्यत्र बोधः लभ्यते। यथा — पिष्टस्य पुनः पेषणं न केवलं निष्फलं भवति, अपितु तस्मात् कोऽपि लाभः न सञ्जायते। तथैव कृतस्य कार्यस्य

पुनरनुष्ठानं अपि न केवलं व्यर्थं, किन्तु समयस्य शक्तेः च अपव्ययः भवति।

एषः न्यायः व्यवहारजगति उपदेशरूपेण प्रसिद्धः अस्ति। कार्यस्य द्वौ प्रकारौ सन्ति – कृतकार्यं च अकृतकार्यं च। कृतकार्यं पुनरपि कर्तुं प्रयत्नं यः करोति, सः केवलं कालस्य शक्तेः च व्यर्थनाशं करोति। अतः, यत् कार्यं अद्यावधि न कृतं, तस्य कार्यस्य आरम्भः करणीयः, येन कालशक्त्योः उपयुक्तं उपयोगः स्यात्। उदाहरणतया यदि कश्चन शोधकः (गवेषकः) किञ्चिद्विषये पूर्वं अनुसन्धानं कृतवान्, तर्हि पुनरपि तस्मिन्नेव विषये गवेषणं कर्तुं यत्नं निरर्थकः स्यात्। तेन कालशक्त्योः निष्फलं व्ययः भवति। अपि च यद् अतीतानां दोषानां वा घटनानां विषये चिन्तनं पुनः पुनः क्रियते, तत्तु अप्राज्ञता। यतः गतं न पुनः आगच्छति। प्रज्ञया अनागते लक्ष्यं स्थाप्य अग्रे गन्तव्यम्।

अतः कालशक्त्योः यथोचितं उपयोगं यथासम्भवम् कर्तुं अयं न्यायः संक्षेपेण प्रयुज्यते। तस्मात् अयं न्यायः अस्मान् बोधयति यत्, सीमितं कालं शक्तिं च कुशलतया योजनीयम्। पूर्वसिद्धं कार्यं पुनः न करणीयम्, अपि तु नूतनं कार्यं, फलदायकं च, तत् करणीयम्। एषः न्यायः यथार्थजीवने समयप्रबन्धनाय, बुद्धिपूर्वकविचाराय च उपयुक्तः अस्ति।

**नीरक्षीरन्यायः —**

दुग्धं च जलं च यदा सह मिलति, तदा तयोः पृथक्करणं अतीव कठिनं कार्यं भवति। प्रकृतेः अद्भुतं सृष्टिः हंसः नाम पक्षिः एतत् दुष्करं कर्म कर्तुं शक्नोति। अस्य हंसस्य असाधारणं सामर्थ्यं अधिष्ठाय एव 'नीरक्षीरन्यायः' इत्ययं न्यायः निर्मितः अस्ति। अस्य न्यायस्य गहनं तत्त्वं अस्माकं जीवने महत्त्वं वहति। एषः केवलं रूपकं न अस्ति, किन्तु न्यायस्य, सत्यस्य च प्रतीकः अस्ति। यदा समाजे भ्रान्तिः, द्वन्द्वं च, अन्यायः च व्याप्यते, तदा एवं नीरक्षीरन्यायेन एव वयं सत्यं च मिथ्या च, शुभं च अशुभं च, न्याय्यं च अन्याय्यं च विविक्तुं शक्नुमः। यथा दुग्धे जले च सम्मिश्रिते, तथैव जनानां मध्ये सज्जनदुर्जनयोः सम्मिश्रणं दृश्यते। अत्र विवेकः, बुद्धिः, सावधानता च आवश्यकाः।

नीरक्षीरन्यायः अस्मान् शिक्षयति यत्, वयं कदापि बाह्यरूपेण न निर्णयं कुर्यामः, किन्तु अन्तर्दृष्ट्या युक्त्या च सह विचारं कृत्वा निर्णयं कुर्यामः। कारणं यत्, सर्वदा सर्वं स्पष्टं न भवति; किञ्चित् काले सत्यं च मिथ्या च, साधु च असाधु च, शुभं च अशुभं च मध्ये सूक्ष्मा रेखा भवति। अत्र अस्माभिः हृदया मनसा च युक्त्या सह गच्छितव्यं, यत् वयं भ्रान्तिं विहाय सत्यं सम्यक् प्रकारेण ज्ञातुं शक्नुमः।

न्यायाधीशस्य इव प्रत्येकस्य मनुष्यस्यापि एषा सामर्थ्या भविष्यति, यदा सः न्यायं अन्यायं च, सत्यं मिथ्यां च स्पष्टतया विवेक्तुं समर्थः भवति। यथा न्यायाधीशः कुशलतया हंसवत् विवेकं प्रयुज्य यथोचितं निर्णयं करोति, तदा समाजे न्यायस्य दृढा स्थापना स्यात्, जनाः परस्परं विश्वासं श्रद्धां च धारयन्ति। हंसविवेकः केवलं न्यायप्रक्रियायामेव न, किं तु व्यक्तिगतसम्बन्धेषु अपि अत्यन्त आवश्यकः। कुटुम्बे, मित्रेषु, सहकर्मसु, समाजे च—यत्र मनुष्यः वास्तविकस्वभावं

ज्ञातुम् अर्हति, तत्र एषा महती शक्तिः स्फुटा भवति। यथा हंसः क्षीरात् जलं पृथक्करोति, तथा वयं अपि बुद्ध्या अन्तःकरणेन च सज्जनं दुर्जनं च विवेक्तुम् अर्हामः।

एवं वयं स्वजीवनतः दोषान् त्यज्य, पापकर्माणि च दूरं नेतुं समर्थाः भविष्यामः। अतिरिक्ततया हंसविवेकः अस्मान् चेतयति यत्—यदा मनुष्येषु अन्धविश्वासः वर्धते, शीघ्रं निर्णयः क्रियते च, तदा विनाशः निश्चितः। अतः धैर्येण निरीक्षणं, सम्यक् विश्लेषणं, चिरकालीनं च विचारणं अनिवार्यम्। यदा वयं हंसविवेकं जीवनस्य मार्गदर्शकम् कुर्मः, तदा न केवलं आत्मनः कल्याणं, अपि तु समग्रं समाजं अपि सत्पथं प्रति नेतुं शक्नुमः। एषः विवेकः यदि प्रत्येकेन आत्मसात्क्रियते, तर्हि समस्तं जगत् शान्तिपूर्णं, सुव्यवस्थितं च उन्नतिमार्गे प्रस्थितं भविष्यति।

**उपसंहारः –**

संस्कृतसाहित्ये 'न्याय' इत्यस्य बहुविधार्थेषु 'लौकिकन्यायः' इति एकः महत्वपूर्णः प्रभावशाली च अवधारणास्ति, या समाजजीवनस्य अनुभवं बुद्धिबलञ्च संक्षिप्तैः दृष्टान्तमूलकैः वाक्यैः व्यक्तं करोति। लौकिकन्यायः शास्त्रीययुक्तेः वाहकः सामाजिकयथार्थस्य च प्रतिबिम्बं भवति। लौकिकन्यायेषु सामान्यतः तादृशानि वाक्यानि भवन्ति, यानि विशेषं किञ्चन घटनां, नीतिं वा परिस्थितिं प्रतीकात्मकं गम्भीरार्थेन च व्यक्तयन्ति। एतानि दृष्टान्तवाक्यानि यथाशास्त्रयुक्तेः विकासे साहाय्यकानि भवन्ति, तथा साधारणजनानां नित्यजीवने निर्णयग्रहणे समस्यासु च समाधानप्राप्तौ मार्गदर्शनं कुर्वन्ति। एषः लौकिकन्यायः कश्चन सांस्कृतिकतत्त्वरूपेण पीढीपरंपरया लोकसमाजे प्रचलितः अस्ति, यः अद्यापि च तस्य महत्वं सप्रसंगत्वं च विद्यमानं अस्ति। तस्य मुख्यलक्षणं तस्य भाषागतसंक्षिप्तता, अर्थगर्भता च, यः दृष्टान्तात्मकव्यञ्जनां समन्वितः। एते न्यायवचनानि प्रात्याहिकजीवनस्य जटिलतानि, मानवीयव्यवहारं, समाजव्यवस्थायाः विविधपक्षान् सरलतया युक्तियुक्तया च प्राञ्जलरूपेण प्रकाशयन्ति। तस्माद् एतेन व्यक्तीनां चिन्तनशक्तिः, न्यायबुद्धिः, निर्णयशक्तिश्च संवर्ध्यन्ते, तथा च समाजे नैतिकचेतनायाः विकासोऽपि समुचितः प्रकारेण साध्यते। अतः लौकिकन्यायः न केवलं भाषा-साहित्ये, किंतु सामाजिकजीवने अपि अमूल्यं दानं ददाति, यः तत्त्वतः मानवजीवनस्य विविधविषयस्य सुगमतरूपेण उद्घाटयति।

शास्त्रकाराः लौकिकन्यायं दृष्टान्तरूपेण स्वीकृत्य कठिनतत्त्वानां सरलबोधनं कृतवन्तः। अनेन तत्त्वजटिलता हीनकर्तुं शक्नोति विषयश्च अधिकग्रहणीयो सुबोधः च भवति। शिक्षाक्षेत्रेऽपि लौकिकन्यायेन विषयबोधः विशिष्टं वृद्धिं प्राप्नोति, यतः तेन विद्यार्थिनां स्पष्टधारणा सुलभतया जायते। अतः लौकिकन्यायः केवलं शास्त्रीयतत्त्वस्य व्याख्याता न भवति, किन्तु सामाजिकसम्पत्तेः अपि अभिधानं वर्तते।

अधुनिकसमाजे अपि लौकिकन्यायस्य प्रभावकारिता स्पष्टतया दृश्यते। सर्वत्र कथ्यते यत् लौकिकन्यायः न केवलं शास्त्रपाण्डित्यस्य विषयः, किन्तु मानवानुभवस्य एकीकृतरूपः अपि

अस्ति। तस्य यथायोग्यं बोधनं च प्रयोगः च व्यक्तेः तथा समाजस्य बुद्धिमत्ता, नैतिकदृढता च समृद्धिं वर्धयति। एतानि न्यायवाक्यानि सततं चर्च्यन्ते, यत् केवलं ज्ञानवर्धनाय न, अपि तु मानवीयचिन्तनस्य मननस्य च विकासाय नवदिगन्तं उद्घाटयन्ति।

एवमेव सिध्यति यत् लौकिकन्यायः न केवलं भूतकालीनकथानकः, अपि तु कालसीमानां अतिक्रम्य सार्वकालिकप्रासङ्गिकता च प्राप्तवान् अस्ति। अतः वयं वदामः — लौकिकन्यायः लोकज्ञानस्य दार्शनिकरूपं यः शास्त्र-साहित्य-समाजचिन्तनानां अनुपमसंयोगं निर्माति। तस्य यथावत् बोधनं च प्रयोगः च न केवलं व्यक्तेः चिन्तनं स्पष्टं करोति, अपितु समाजे न्यायस्य, युक्तेः, नीतेः च प्रकाशं प्रसारयितुं समर्थः भवति।

## Endnotes

1. अतिदूरात् समीप्यात् इन्द्रियघातान्मनोऽनवस्थानात्।
   सौक्ष्म्यात् व्यवधानादभिभवात्समानाभिहाराच्च॥ कारिका ७, पृ. ७८
2. सांख्यतत्त्वकौमुदी ६७, पृ.३६०
3. पतञ्जलियोगदर्शनम्, साधनपादः २, पृ. १४०
4. भाषापरिच्छेदः ८५, पृ. ४८३

## Bibliography


- आरण्यः, हरिहरानन्दः, सम्पादकः। *पातञ्जलयोगदर्शनम्।* कलिकाता: पश्चिमबङ्गराज्यपुस्तकपरिषद्, २०१५।
- उदासीनः, रघुनाथवर्मा, सम्पादकः। *लौकिकन्यायसङ्ग्रहः* । कोलम्बिया, मिसौरी : ई. जे. लाजरस्-कम्पन्याख्येन मुद्रितं, १९९८।
- गोस्वामी, नारायणचन्द्रः, सम्पादकः। *तर्कसङ्ग्रहः* । कलिकाता : संस्कृतपुस्तकभाण्डारः, १४१३ शकाब्दे।
- ---। *साङ्ख्यतत्त्वकौमुदी* । कलिकाता : संस्कृतपुस्तकभाण्डारः, २०१६।
- झा, मदनमोहनः, सम्पादकः। *अमरकोशः* । मुम्बई : राष्ट्रीयसंस्कृतसंस्थानम्।
- तर्कबागीशः, फणिभूषणः, सम्पादकः। *न्यायपरिचयः* । कलिकाता : राष्ट्रीयशिक्षापरिषद्, १३४७ शकाब्दे।
- मिश्रः, रामचन्द्रविद्यावाचस्पतिः, सम्पादकः। *लौकिकन्यारत्नाकरः* । दरभङ्गा, विहारराज्यम् : कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयेन प्रकाशितम्, १९८२।
- बन्द्योपाध्यायः, हरिचरणः, सम्पादकः। *बङ्गीयशब्दकोशः* । दिल्ली : साहित्यअकादमी, १९८८।
- शास्त्री, पञ्चाननभट्टाचार्यः, सम्पादकः। *भाषापरिच्छेदः* । कलिकाता : महाबोधिबूक्एजेन्सी, २०१६।
- Apte, Vaman Shivam. *Sanskrit-English Dictionary.* Second Edition. Bombay: Gopal Narayen & Co. , 1922.
- ---. *The Practical Sanskrit-English Dictionary*. Delhi: Motilal Banarsidass, 1998.